# मुकुंदमाला स्तोत्रं

घुष्यते यस्य नगरे रंगयात्रा दिने दिने ।
तमहं शिरसा वंदे राजानं कुलशेखरम् ॥

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुंठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासे-
-त्यालापनं प्रतिपदं कुरु मे मुकुंद ॥ 1

जयतु जयतु देवो देवकीनंदनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलांगो
जयतु जयतु पृथ्वीभारनाशो मुकुंदः ॥ 2

मुकुंद मूर्ध्ना प्रणिपत्य याचे
भवंतमेकांतमियंतमर्थम् ।
अविस्मृतिस्त्वच्चरणारविंदे
भवे भवे मेऽस्तु भवत्प्रसादात् ॥ 3

नाहं वंदे तव चरणयोर् द्वंद्वमद्वंद्वहेतोः
कुंभीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्यारामामृदुतनुलता नंदने नापि रंतुं
भावे भावे हृदयभवने भावयेयं भवंतम् ॥ 4

© 2022 Vēdam Nadam

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद्भव्यं भवतु भगवन् पूर्वकर्मानुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मांतरेऽपि
त्वत्पादांभोरुहयुगगता निश्चला भक्तिरस्तु ॥ 5

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकांतक प्रकामम् ।
अवधीरित शारदारविंदौ
चरणौ ते मरणेऽपि चिंतयामि ॥ 6

कृष्ण त्वदीय पदपंकजपंजरांत-
-मद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कंठावरोधनविधौ स्मरणं कुतस्ते ॥ 7

चिंतयामि हरिमेव संततं
मंदमंद हसिताननांबुजं ।
नंदगोपतनयं परात्परं
नारदादिमुनिबृंदवंदितम् ॥ 8

करचरणसरोजे कांतिमन्नेत्रमीने
श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे ।
हरिसरसि विगाह्यापीय तेजोजलौघं
भवमरुपरिखिन्नः खेदमद्य त्यजामि ॥ 9

© 2022 Vēdam Nadam

सरसिजनयने सशंखचक्रे
मुरभिदि मा विरम स्वचित्त रंतुम् ।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम् ॥ 10

मा भीर्मंदमनो विचिंत्य बहुधा यामीश्चिरं यातनाः
नामी नः प्रभवंति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ 11

भवजलधिगतानां द्वंद्ववाताहतानां
सुतदुहितृकळत्रत्राणभारार्दितानाम् ।
विषमविषयतोये मज्जतामप्लवानां
भवतु शरणमेको विष्णुपोतो नराणाम् ॥ 12

भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मा स्म गाः कातरत्वम् ।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ 13

तृष्णातोये मदनपवनोद्धूत मोहोर्मिमाले
दारावर्ते तनयसहजग्राहसंघाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादांभोजे वरद भवतो भक्तिनावं प्रयच्छ ॥ 14

© 2022 Vēdam Nadam

माद्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान्पदाब्जे
माश्रौषं श्राव्यबंधं तव चरितमपास्यान्यदाख्यानजातम् ।
मास्मार्षं माधव त्वामपि भुवनपते चेतसापह्नुवाना-
-न्माभूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मांतरेऽपि ॥ 15

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वंद्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छांघ्रियुग्मालयं
जिघ्र घ्राण मुकुंदपादतुलसीं मूर्धन्नमाधोक्षजम् ॥ 16

हे लोकाः शृणुत प्रसूतिमरणव्याधेश्चिकित्सामिमां
योगज्ञाः समुदाहरंति मुनयो यां याज्ञवल्क्यादयः ।
अंतर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतां
तत्पीतं परमौषधं वितनुते निर्वाणमात्यंतिकम् ॥ 17

हे मर्त्याः परमं हितं शृणुत वो वक्ष्यामि संक्षेपतः
संसारार्णवमापदूर्मिबहुलं सम्यक्प्रविश्य स्थिताः ।
नानाज्ञानमपास्य चेतसि नमो नारायणायेत्यमुं
मंत्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः ॥ 18

पृथ्वीरेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिंगोऽलघु-
-स्तेजो निःश्वसनं मरुत्तनुतरं रंध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुराः
दृष्टे यत्र स तावको विजयते भूमावधूतावधिः ॥ 19

© 2022 Vēdam Nadam

बद्धेनांजलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कंठेन स्वरगद्गदेन नयनेनोद्गीर्णबाष्पांबुना ।
नित्यं त्वच्चरणारविंदयुगळ ध्यानामृतास्वादिना-
-मस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥ 20

हे गोपालक हे कृपाजलनिधे हे सिंधुकन्यापते
हे कंसांतक हे गजेंद्रकरुणापारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो हे पुंडरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥ 21

भक्तापायभुजंगगारुडमणिस्त्रैलोक्यरक्षामणिः
गोपीलोचनचातकांबुदमणिः सौंदर्यमुद्रामणिः ।
यः कांतामणि रुक्मिणी घनकुचद्वंद्वैकभूषामणिः
श्रेयो देवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ 22

शत्रुच्छेदैकमंत्रं सकलमुपनिषद्वाक्यसंपूज्यमंत्रं
संसारोत्तारमंत्रं समुपचिततमः संघनिर्याणमंत्रम् ।
सर्वैश्वर्यैकमंत्रं व्यसनभुजगसंदष्टसंत्राणमंत्रं
जिह्वे श्रीकृष्णमंत्रं जप जप सततं जन्मसाफल्यमंत्रम् ॥ 23

व्यामोह प्रशमौषधं मुनिमनोवृत्ति प्रवृत्त्यौषधं
दैत्येंद्रार्तिकरौषधं त्रिभुवनी संजीवनैकौषधम् ।
भक्तात्यंतहितौषधं भवभयप्रध्वंसनैकौषधं
श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णदिव्यौषधम् ॥ 24

आम्नायाभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं
मेदश्छेदफलानि पूर्तविधयः सर्वे हुतं भस्मनि ।
तीर्थानामवगाहनानि च गजस्नानं विना यत्पद-
-द्वंद्वांभोरुहसंस्मृतिर्विजयते देवः स नारायणः ॥ 25

श्रीमन्नाम प्रोच्य नारायणाख्यं
के न प्रापुर्वांछितं पापिनोऽपि ।
हा नः पूर्वं वाक्प्रवृत्ता न तस्मिन्
तेन प्राप्तं गर्भवासादिदुःखम् ॥ 26

मज्जन्मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीय मदनुग्रह एष एव ।
त्वद्भृत्यभृत्य परिचारक भृत्यभृत्य
भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ 27

नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूका वराका वयम् ॥ 28

मदन परिहर स्थितिं मदीये
मनसि मुकुंदपदारविंदधाम्नि ।
हरनयनकृशानुना कृशोऽसि
स्मरसि न चक्रपराक्रमं मुरारेः ॥ 29

तत्त्वं ब्रुवाणानि परं परस्मा-
-न्मधु क्षरंतीव सतां फलानि ।
प्रावर्तय प्रांजलिरस्मि जिह्वे
नामानि नारायण गोचराणि ॥ 30

इदं शरीरं परिणामपेशलं
पतत्यवश्यं श्लथसंधिजर्जरम् ।
किमौषधैः क्लिश्यसि मूढ दुर्मते
निरामयं कृष्णरसायनं पिब ॥ 31

दारा वाराकरवरसुता ते तनूजो विरिंचिः
स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः ।
मुक्तिर्माया जगदविकलं तावकी देवकी ते
माता मित्रं बलरिपुसुतस्त्वय्यतोऽन्यन्न जाने ॥ 32

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति सर्वमेतदखिलं हे कृष्ण रक्षस्व माम् ॥ 33

तत्त्वं प्रसीद भगवन् कुरु मय्यनाथे
विष्णो कृपां परमकारुणिकः किल त्वम् ।
संसारसागरनिमग्नमनंतदीन-
-मुद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि ॥ 34

नमामि नारायणपादपंकजं
करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलं
स्मरामि नारायणतत्त्वमव्ययम् ॥ 35

श्रीनाथ नारायण वासुदेव
श्रीकृष्ण भक्तप्रिय चक्रपाणे ।
श्रीपद्मनाभाच्युत कैटभारे
श्रीराम पद्माक्ष हरे मुरारे ॥ 36

अनंत वैकुंठ मुकुंद कृष्ण
गोविंद दामोदर माधवेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चि-
-दहो जनानां व्यसनाभिमुख्यम् ॥ 37

ध्यायंति ये विष्णुमनंतमव्ययं
हृत्पद्ममध्ये सततं व्यवस्थितम् ।
समाहितानां सतताभयप्रदं
ते यांति सिद्धिं परमां च वैष्णवीम् ॥ 38

क्षीरसागरतरंगशीकरा-
-ऽऽसारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने
माधवाय मधुविद्विषे नमः ॥ 39

© 2022 Vēdam Nadam

यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ
मित्रे द्विजन्मवरपद्मशरावभूताम् ।
तेनांबुजाक्षचरणांबुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण ॥ 40

॥ इति कुलशेखर प्रणीतं मुकुंदमाला ॥

© 2022 Vēdam Nadam